## जगद्गुरुश्रीमन्मध्वाचार्यमूलमहासंस्थानम्

### पेजावरअधोक्षजमठः,उडुपी

# अनुग्रहसन्देशः

छन्दः पादौ तु वेदस्य हस्तौ कल्पोऽथ पठ्यते। ज्योतिषामायनं चक्षुः निरुक्तं श्रोत्रमुच्यते ॥" इति प्रमाणानुसारं ज्योतिषशास्त्रं वेदपुरुषस्य नेत्रं मन्यते। यथा नेत्रं विना रूपदर्शनं न सम्भवति, तथैव ज्योतिषशास्त्रस्य ज्ञानं विना कालस्य, कर्मफलस्य, शुभाशुभयोश्च सम्यक् ज्ञानं न सम्भवति। भारतीय-होराशास्त्रपरम्परायां (फलज्योतिषशास्त्रे) श्रीवैद्यनाथदीक्षितैः विरचितः 'जातकपारिजातः' इति ग्रन्थः अत्यन्तं श्रेष्ठः, दैवज्ञानां कृते मार्ग-दर्शकश्च वर्तते। आयुर्दायनिर्णये, दशाफलकथने, योगानां स्पष्टीकरणे चायं ग्रन्थः पारिजातवृक्ष इवास्ति।

अस्य फलज्योतिषग्रन्थस्य सुष्ठु सम्पादनं कृत्वा, अद्य 'वेदवेदान्ताध्ययनशोधसंस्थानेनायं ग्रन्थः प्रकाश्यते इति ज्ञात्वा वयं भृशं मोदामहे। एतादृशग्रन्थस्य सम्पादनं महता परिश्रमेण निष्ठया च कृतवद्भ्यः सम्पादकेभ्यः विठोबाचार्येभ्यः एवं श्रीप्रदीपसिंहाचार्येभ्यश्च वयं सानुग्रहं आशिषो वितरामः।

इत्यनेकनारायणस्मरणानि

**श्रीविश्वप्रसन्नतीर्थश्रीपादाः**

# निदेशकवचनम्

"अप्रत्यक्षाणि शास्त्राणि विवादस्तेषु केवलम् ।
प्रत्यक्षं ज्योतिषं शास्त्रं चन्द्रार्कौ यत्र साक्षिणौ ॥"

भारतीयज्ञानपरम्परायां ज्योतिषशास्त्रस्यातीव महत्त्वपूर्णं स्थानं वर्तते। अनेन शास्त्रेण मनुष्यः स्वस्य प्रारब्धकर्म ज्ञात्वा, तत्परिहाराय प्रायश्चित्तमाचरन् स्वविहितकर्मद्वारा भगवदनुग्रहं प्राप्तुं ज्योतिषमेव शरणम् ।

प्रत्यक्षशास्त्रेत्यन्वर्थनामधेयस्यास्य ज्योतिषशास्त्रस्यध्ययनाय श्रीवैद्यनाथ-दीक्षितैः प्रणीतम् अनर्घ्यरत्नं 'जातकपारिजातः' इति ग्रन्थम् अद्य वेदवेदान्ताध्ययन-शोधसंस्थानेन प्रकाशितं सत्, विदुषां पुरतः समुपस्थापयितुं वयं भृशं मोदामहे। विविधाः योगाः, ग्रहाणां भावफलानि, अष्टकवर्गः, दशापहारश्चेत्ये एतेषु विषयेषु पराशरादिमहर्षीणां मूलाशयमयं ग्रन्थः स्पष्टतया प्रतिपादयति ।

मानवानां जीवने अतीव समस्याः समुत्पन्ना भवन्ति। समस्यापरिहारार्थं देवताश्रयणमेव समुचिता रीतिः ।कण्टकाः न केवलम् इदानीन्तनदोषोत्पन्नाः, किन्तु प्राचीनकर्मोत्पन्ना अपि मानुषान् आधिव्याध्यादिरूपेण बाधन्ते। बाध-परिराय प्राचीनैरनुसृतक्रमेषु जातकपरिशीलनमप्येकम् ।जननसमये विद्यमान-ग्रहादिस्थानमालोक्य तदनुसारेण ग्रहाणां नवांशद्वादशांशादिस्थानान्यपि विविच्य विज्ञाय तदनुसारेण नवानां ग्रहाणामपि शुभाशुभफलदत्वमपि ज्योतिषग्रन्थोभ्यो भवतीति अवश्यमध्येतव्यमिदं शास्त्रम् ।

अस्य ग्रन्थस्य प्रकाशने अस्माकं मार्गदर्शकाः, श्रीपेजावरमठाधीश्वराः, परमपूज्य श्रीश्रीविश्वप्रसन्नतीर्थश्रीचरणाः। पूज्यपादानां "ज्ञानदानमेव परमं

# सम्पादकीयम्

वेदाङ्गभूतं ज्योतिषशास्त्रं भगवता वराहेनैव सृष्टमिति - सृष्टं पुरा वेदचक्षुर्मयेदम् इति वचनात् ज्ञायते। यथा चक्षुर्विहीनस्य पुरुषस्य लोके गतिर्नास्ति, तथैव ज्योतिषज्ञानं विना वैदिककर्मानुष्ठाने कालनिर्णयः, जीवने शुभाशुभफलादेशश्च दुष्करः भवति । अस्मिन् शास्त्रे स्कन्धत्रयं वर्तते - सिद्धान्तः, संहिता, होरा चेति । तत्र होरास्कन्धे फलादेशप्रक्रिया विस्तरेण वर्णिता अस्ति ।

फलितज्योतिषग्रन्थमालायां "जातकपारिजातः" देदीप्यमानं रत्नमिव शोभते । प्राचीनाचार्याणां गार्ग्य-पराशर-यवनादीनां मतानि एकीकृत्य, विश्वनाथदैवज्ञवर्यैः विरचितः अयं ग्रन्थः ज्योतिर्विदां कृते कल्पवृक्षायते। यद्यपि बृहज्जातकसारावल्यादयः बहवो ग्रन्थाः सन्ति, तथापि जातकपारिजातस्य शैली, विषयविन्यासः, योगविचारश्चातीव रमणीयः। अस्मिन् ग्रन्थे राजयोगाः, अरिष्टयोगाः, दशाफलं चेतयादीनि सुसूक्ष्मं विश्लेषितम्।

अस्य ग्रन्थस्य अनेकानि संस्करणानि पूर्वं प्रकाशितानि । किन्तु कालक्रमेण मुद्राराक्षसदोषात्, पाठभेदाच्च क्वचिदर्थक्लेशः जायते स्म। अतः अस्य ग्रन्थस्य परिशुद्धं संस्करणं प्रकाशयितुम् आवाभ्यां प्रयत्नः कृतः । मानवमात्रसुलभाः दोषाः अत्र सम्भाव्यन्ते । अतः "गच्छतः स्खलनं क्वापि भवत्येव प्रमादतः" इति न्यायेन, अत्र विद्यमानान् दोषान् उपेक्ष्य, गुणान् स्वीकुर्वन्तु इति बुधजनान् प्रार्थयावहे ।

**डा.आर्. विठोबाचार्यः**

**सि.आर्. प्रदीपसिंहाचार्यः, चतुर्वेदः**

अथ रव्यादीनां रत्नानि 13

अथ ग्रहाणां वस्त्रादिनिरूपणम् 13

अथ प्रदेशविभाग इनादीनाम् 13

अथ ग्रहाणां जातयो गुणाश्च 14

अथ ग्रहाणां नरादिसंज्ञा महाभूताधिपत्यश्च 14

अथ ग्रहाणां कक्षाक्रमः 14

अथ सुर्यादीनां धातुविशेषादि 14

अथ रव्यादीनां स्थानविशेषे दृष्टयः 15

अथ रव्यादीनां दृष्टिविशेषे बलित्वम् 15

अथ ग्रहाणामूर्ध्वादिदृष्टयः 15

अथ ग्रहाणां स्थानबलम् 15

अथ ग्रहाणां दिग्बलम् 15

अथ कालबलम् 16

अथ चेष्टाबलम् 16

अथ ग्रहानां निसर्गबलम् 16

अथ बलप्रमाणम् 16

अथ ग्रहाणां तात्कालिकमैत्रीविचारः 16

अथ सूर्यादीनां नैसर्गिकाः शत्रुमित्रोदासीनाः 16

अथ सूर्यादिभ्यः फलविशेषचिन्ता 17

अथ ग्रहाणां भावकारकत्वम् 17

अथ ग्रहाणां स्थानविशेषे शुभाशुभप्रदता 17

अथ सूर्यादीनां स्वरूपाणि 18

अथ पञ्चदशाब्दायुः 41

अथ षोडशेऽब्दे मरणम् 42

अथ सप्तदशेऽब्दे मृत्युः 42

अथ अष्टादशेऽब्दे मृत्युः 42

अथ सद्यो मृत्युः 42

अथ १९ वर्षे मृत्युः 42

अथ २० वर्षे मृत्युः 42

अथ २२ वर्षे मृत्युः 42

अथ २६-२७ वर्षे मृत्युः 43

अथ २८ वर्षे मरणम् 43

अथ २९ वर्षे मृत्युः 43

अथ २९ वा ३० वर्षे मृत्युः 43

अथ ३२ वर्षे मरणम् 43

अथ अल्पायुर्योगाः 43

अथारिष्टभङ्गाः 44

अथ चन्द्रकृतोऽरिष्टभङ्गः 44

अथ शुभग्रहकृतोऽरिष्टभङ्गः 44

अथ चन्द्रकृतोऽरिष्टभङ्गः 44

अथ गुरुकृतोऽरिष्टभङ्गः 45

अथ लग्नेशकृतोऽरिष्टभङ्गः 45

अथ ग्रहकृतोऽरिष्टभङ्गः 45

अथ राहुकृतोऽरिष्टभङ्गः 45

| | |
|---|---|
| अथ पुनश्चन्द्रकृतोऽरिष्टभङ्गः | 45 |
| अथ राशीशकृतोऽरिष्टभङ्गः | 45 |
| अथ लग्नेशकृतोऽरिष्टभङ्गः | 46 |
| अथ मध्यमायुःप्रदता जीवस्य | 46 |
| अथ पूर्णायुःप्रदा योगाः | 46 |
| अथ पूर्णायुषः प्रमाणम् | 47 |
| सप्तत्युपरिशतान्तं पूर्णमायुः | 47 |
| अथ योगविशेषात् युगान्तमायुः | 47 |
| अथ मुनित्वप्रदो ग्रहयोगः | 47 |
| अथ अमितमायुः | 48 |
| अथ देवसादृश्यप्रदा ग्रहस्थितिः | 48 |
| अथ असङ्ख्यायुःप्राप्तिः | 48 |
| अथ मुनिसमत्वम् | 48 |
| अथ युगान्तमायुः | 48 |
| अथ ब्रह्मपदप्राप्तिः | 48 |
| अथ आयुषः सप्तविधता | 49 |
| अथ आयुर्दायाध्यायः ॥५ ॥ | 50 |
| अथ निसर्गायुषो वर्षसङ्ख्याः | 50 |
| अथ पिण्डायुषो वर्षसङ्ख्याः | 50 |
| अथ पिण्डायुषः स्पष्टीकरणविधिः | 50 |
| अथ आयुषो हरणं होरायाम् | 50 |
| अथ व्ययादिहरणम् | 51 |

| | |
|---|---|
| अथ क्रुरोदयहरणम् | 51 |
| अथ लग्नायुःसाधनम् | 52 |
| अथ षड्विधहरणम् | 52 |
| अथ अंशकायुः | 52 |
| अथ रश्मिजायुः | 53 |
| अथ रश्मेर्हरणम् | 53 |
| अथ चक्रायुः | 53 |
| अथ दशायुः | 53 |
| अथ बलोपेते शुभदृष्टेऽशसम्भवम् | 54 |
| अथायुषः स्पष्टीकरणम् | 54 |
| आयुषोऽधिकारिणः | 54 |
| अथ नानाजातीयमायुः | 55 |
| अरिष्टदशा | 55 |
| अथ च्छिद्रग्रहाः | 56 |
| अथ द्रेक्काणस्वरूपम् | 56 |
| अथ जीवदेहमृत्युसंज्ञाः | 57 |
| अथ निर्याणसमयाः | 57 |
| अथ निर्याणहेतुः | 59 |
| अथ हस्तादिविच्छेदयोगाः | 61 |
| अथ दुर्मरणयोगाः | 62 |
| अथ निर्याणदिग्ज्ञानम् | 64 |
| अथ मोहकालः शेषपरिणामश्च | 64 |

| | |
|---|---|
| अथ मरणानन्तरं गतिज्ञानम् | 65 |
| अध्यायोपसंहारः | 65 |
| अथ जातकभङ्गाध्यायः ॥६ ॥ | 66 |
| तत्रादौ जातकभङ्गपरिभाषा | 66 |
| राजभङ्गाः | 66 |
| अथ रेकायोगाः | 68 |
| रेकायोगफलम् | 69 |
| अथ दरिद्रयोगाः | 70 |
| अथ दरिद्रयोगफलम् | 71 |
| अथ प्रेष्ययोगाः | 71 |
| अथ प्रेष्ययोगफलम् | 72 |
| अथ अङ्गहीनयोगाः | 72 |
| अथ रोगयोगाः | 74 |
| अथ होरायोगाः | 79 |
| अथ राजयोगाध्यायः ॥७ ॥ | 80 |
| अथ पञ्च महापुरुषयोगाः | 87 |
| अथ रुचकयोगफलम् | 87 |
| अथ भद्रयोगफलम् | 88 |
| अथ हंसयोगफलम् | 88 |
| अथ मालव्ययोगफलम् | 88 |
| अथ शशयोगफलम् | 88 |
| गर्गहोरायाम् | 88 |

| | |
|---|---|
| अथैकाधिपत्यशोधनम् | 152 |
| अथ प्रथमद्वितीयभावफलाध्यायः ॥११ ॥ | 157 |
| अथ तनुभावफलम् | 158 |
| अथ द्वितीयभावफलम् | 162 |
| अथ नेत्रविचारः | 164 |
| अथ मुखविचारः | 164 |
| अथ विद्या-वाग्विचारः | 165 |
| अथ कुटुम्बविचारः | 166 |
| अथ पात्राशनयोगविचारः | 167 |
| अथ तृतीयचतुर्थभावफलाध्यायः ॥१२ ॥ | 168 |
| तत्र तृतीयभावफलम् | 168 |
| अथ भ्रातृविचारः | 168 |
| अथ सोदरसङ्ख्याज्ञानम् | 169 |
| अथ भ्रात्रारिष्टम् | 171 |
| पराक्रमविचारः | 172 |
| अथ कण्ठविचारः | 172 |
| अथ श्रुतिभूषाणाविचारः | 173 |
| अथ वस्त्रविचारः | 173 |
| अथ धैर्यविचारः | 173 |
| अथ बलविचारः | 174 |
| अथ अशनविचारः | 174 |
| अथ चतुर्थभावफलम् | 174 |

| | |
|---|---|
| अथ विद्याविचारः | 175 |
| अथ मातृविचारः | 175 |
| अथ सुखविचारः | 177 |
| अथ सुखादिविचारनिर्णयः | 178 |
| अथ सुगन्धविचारः | 178 |
| अथ वस्त्रविचारः | 178 |
| अथ बन्धुविचारः | 178 |
| अथ मनोविचारः | 179 |
| अथ वाहनविचारः | 179 |
| अथ राज्यविचारः | 180 |
| अथ राजयोगाः | 182 |
| अथ क्षेत्रविचारः | 183 |
| अथ गृहविचारः | 184 |
| अथ पञ्चमषष्ठभावफलाध्यायः ॥१३ ॥ | 186 |
| अथ पञ्चमभावफलम् | 186 |
| अथ देवताविचारः | 186 |
| अथ राज्यविचारः | 186 |
| अथ जन्मविचारः | 186 |
| अथ पुत्रविचारः | 187 |
| अथ पितृविचारः | 192 |
| अथ बुद्धिविचारः | 193 |
| अथ पुण्यविचारः | 194 |

| | |
|---|---|
| अथ षष्ठभावफलम् | 194 |
| तत्रादौ रोगविचारः | 194 |
| अथ सप्तमाष्टमनवमभावफलाध्यायः ॥१४ ॥ | 197 |
| तत्र सप्तमभावफलम् | 197 |
| अथ विवाहकालः | 200 |
| अथ वरवधूजातकसंयोगः | 201 |
| अथ स्त्रियाः स्तनविचारः | 201 |
| अथ गम्यस्त्रीविचारणम् | 202 |
| अथ स्त्रीसङ्गमे स्थानविचारः | 202 |
| अथ भगचुम्बनयोगः | 202 |
| अथ स्त्रिया भगविचारः | 203 |
| अथ दशमैकादशद्वादशभावफलाध्यायः ॥१५ ॥ | 204 |
| तत्र दशमभावफलम् | 204 |
| अथ कर्मविचारः | 204 |
| अथ प्रव्रज्यायोगः | 206 |
| अथ जीविकायोगाः | 209 |
| अथ ग्रहाणां वृत्तयः | 210 |
| अथ आज्ञाविचारः | 211 |
| अथ कीर्ति-मान-कृषि-व्यापार-निद्राविचारः | 211 |
| अथ लाभभावफलम् | 212 |
| अथ व्ययभावफलम् | 213 |
| अथ दानविचारः | 214 |

| | |
|---|---|
| अथ शयनविचारः | 214 |
| अथ गतिविचारः | 214 |
| अथ स्त्रीजातकाध्यायः ॥१६ ॥ | 216 |
| अथ त्रिंशांशफलम् | 217 |
| अथ पतिलक्षणम् | 223 |
| अथ कालचक्रदशाध्यायः ॥१७ ॥ | 225 |
| अथ देहजीवफलम् | 228 |
| अथ त्रिविधकालचक्रगतिः | 235 |
| अथ कालचक्रदशाप्रकारः | 236 |
| अथ सव्यचक्रवाक्यानि | 237 |
| अथापसव्यचक्रवाक्यानि | 237 |
| अथ कालचक्रदशावर्षाणि | 238 |
| अथान्तर्दशाप्रकारः | 238 |
| अथ दशाफलाध्यायः ॥१८ ॥ | 239 |
| अथ विंशोत्तरी महादशा | 239 |
| अथ दशापतेः शुभाशुभत्वम् | 239 |
| अथ निर्याणदशा | 243 |
| अथ गुलिकदशा | 243 |
| अथ शूलदशा | 243 |
| अथ महादशाविशेषः | 244 |
| अथान्तर्दशाविशेषफलम् | 244 |
| अथान्तर्दशाफलानि | 246 |

कन्यानृयुग्मघटतौलिधराख्या
लग्नान्विता यदि नरा द्विपदा बलाढ्याः ॥ १६ ॥

मृगापरार्द्धान्त्यकुलीरसंज्ञा जलाभिधाना बलिनश्चतुर्थे ।
जलाश्रयो वृश्चिकनामधेयः स सप्तमस्थानगतो बली स्यात् ॥ १७ ॥

केन्द्रं गतोऽहि द्विपदो बलाढ्यः चतुष्पदाः केन्द्रगता रजन्याम् ।
कीटास्तु सर्वे यदि कण्टकस्थाः सन्धिद्वये वीर्ययुता भवन्ति ॥ १८ ॥

## अथ राशीनां धातु-मूल-जीवसंज्ञाः

धातुर्मूलं जीवमित्वाहुरार्या मेषादीनामोजयुग्मे तथैव ।
स्वर्णाद्धातुर्मृत्तिकान्तं तृणान्तं वृक्षान्मूलं जीवकोटिः स जीवः ॥ १९

## अथ मेषादीनां विप्रत्वानिरूपणम्

मीनालिवृषभा विप्राश्चापाजहरयो नृपाः ।
कुम्भयुग्मतुला वैश्याः शूद्राः स्त्रीमृगकर्कटाः ॥ २० ॥

## अथ मेषादीनां कालविशेषे अन्धत्वादिनिरूपणम्

सदा निशान्धाः क्रियगोमृगेशा मध्यन्दिने कर्कटयुग्मकान्ताः ।
पूर्वाह्णकाले बधिरौ तुलाली धन्वी मृगाख्यश्च तथाऽपराह्णे ॥ २१ ॥

मृगास्यश्चापधरश्च पङ्गू सन्धिद्वये नाशकरौ भवेताम् ।
स्याद्दक्षसन्धिः कटकालिमीनभान्तं गण्डान्तमिति प्रसिद्धम् ॥ २२ ॥

## अथ मेषादीनां वर्णविशेषः

रक्तगौरशुककान्तिपाटलाः पाण्डुचित्ररुचिनीलकाञ्चनाः ।
पिङ्गलः शबलबभ्रुपाण्डुरास्तुम्बुरादिभवनेषु कलिताः ॥ २३ ॥

व्ययार्थौ पापसंयुक्तौ शुभदृष्टिविवर्जितौ ।
क्रूरषष्ट्यंशसंयुक्तौ वाऽल्पमायुर्विनिर्दिशेत् ॥ ७१ ॥

इति द्वात्रिंशद्वत्सरान्तर्भूतबालारिष्टयोगारिष्टस्वल्पायुर्भेदाः समाप्ताः ।

## अथारिष्टभङ्गाः

अत्यन्तसत्त्वे यदि लग्ननाथे सौम्यान्विते तादृशदृष्टियोगे ।
केन्द्रस्थिते पापदृशा विहीने सद्भाग्ययुग् जीवति दीर्घमायुः ॥ ७२ ॥

## अथ चन्द्रकृतोऽरिष्टभङ्गः

चन्द्रः सम्पूर्णगात्रस्तु सौम्यक्षेत्रांशगोऽपि वा ।
सर्वारिष्टनिहन्ता स्याद् विशेषाच्छुक्रवीक्षितः ॥ ७३ ॥

## अथ शुभग्रहकृतोऽरिष्टभङ्गः

जीवभार्गवसौम्यानामेकः केन्द्रगतो बली ।
पापकृद्योगहीनश्चेत्सद्योऽरिष्टस्य भङ्गकृत् ॥ ७४ ॥

## अथ चन्द्रकृतोऽरिष्टभङ्गः

स्वोच्चस्थः स्वगृहेऽथवापि सुहृदां वर्गे च सौम्यस्य वा ।
सम्पूर्णः शुभवीक्षितः शशधरो वर्गे स्वकीयेऽपि वा ॥ ७५ ॥

शत्रूणामवलोकनादिरहितः पापैरयुक्तेक्षितो ।
अरिष्टं हन्ति दुस्तरं दिनमणिः प्रालेयराशिं यथा ॥ ७६ ॥

पक्षे सिते भवति जन्म यदि क्षपायां
कृष्णेऽथवाऽहनि शुभाशुभदृष्टमूर्तिः ।
तं चन्द्रमा रिपुविनाशगतोऽपि नूनम्
आपत्सु रक्षति पितेव शिशुं प्रजातम् ॥ ७७ ॥

षड्सप्तारन्ध्रभावेषु शुभेषु सहितेषु च ।
त्रिषडायेषु पापेषु दीर्घमायुर्विनिर्दिशेत् ॥ ९३ ॥

रिःफशत्रुगताः पापा लग्नेशे यदि केन्द्रगः ।
रन्ध्रस्थानगताः पापाः कर्मेशः बहुसम्मतम् ॥ ९४ ॥

रन्ध्रेशस्थगृहाधीशो यस्मिन् राशौ व्यवस्थितः ।
तदीशो लग्ननाथश्च केन्द्रगो यदि तादृशम् ॥ ९५ ॥

द्विस्वभावं गते लग्ने तदीशे केन्द्रगेऽपि वा ।
स्वोच्चमूलत्रिकोणे वा चिरं जीवति भाग्यवान् ॥ ९६ ॥

द्विस्वभावं गते लग्ने लग्नेशात् केन्द्रगौ यदि ।
द्वौ पापौ यस्य जनने तस्यायुर्दीर्घमादिशेत् ॥ ९७ ॥

चरांशकस्था रविमन्दभौमाः स्थिरांशकस्थौ गुरुदानवेज्यौ ।
शेषाश्च युग्मांशगता यदि स्युस्तदा समुद्भूतनरः शतायुः ॥ ९८ ॥

## अथ पूर्णायुषः प्रमाणम्

## सप्तत्युपरिशतान्तं पूर्णमायुः

## अथ योगविशेषात् युगान्तमायुः

मन्दांशकस्था रविजीवभौमा धर्मस्थितास्तन्नवभागसंस्थाः ।
बलान्विता लग्नगतो हिमांशुर्युगान्तमायुः श्रियमादधाति ॥ ९९ ॥

## अथ मुनित्वप्रदो ग्रहयोगः

एकांशभागौ गुरुसूर्यपुत्रौ धर्मस्थितौ वा यदि कर्मसंस्थौ ।
अर्कोदये सौम्यनिरीक्ष्यमाणौ मुनिर्भवेदत्र भवश्चिरायुः ॥ १०० ॥

हित्वा वक्रं रिपुगृहगतैर्हीयते स्वत्रिभागः
सूर्योच्चिक्षत्रद्युतिषु च दलं प्रोज्झ्य शुक्रार्कपुत्रौ ॥ ७ ॥

क्षोणीपुत्रं वर्जयित्वा रिपुस्थान्व्यंशं नीचस्थानगास्ते तदर्धम् ।
अस्तं याताः सर्व एवार्धहानिं कुर्युर्हित्वा शुक्रमार्तण्डपुत्रौ ॥ ८ ॥

## अथ व्ययादिहरणम्

सर्वार्धत्रिचरणपञ्चषष्ठभागाः
क्षीयन्ते व्ययभवनादसत्सु वामम् ।
सत्स्वर्धं ह्रसति तथैकराशिगानाम्
एकोऽंशं हरति बली तथाऽह सत्यः ॥ ९ ॥

एकर्क्षोपगानां यो भवति बलाधिको विशेषेण ।
क्षपयति यथोत्कमंशं स एव नान्योऽपि तत्रस्थः ॥ १० ॥

## अथ क्रुरोदयहरणम्

सार्धोदितोदितनवांशहतात्समस्ताद्
भागोऽष्टयुक्तशतसङ्ख्च उपैति नाशम् ।
क्रूरे विलग्नसहिते विधिना त्वनेन
सौम्येक्षिते दलमतः प्रलयं प्रयाति ॥ ११ ॥

लिप्तिभूतैर्लग्नभागैर्निहन्याद्
आयुर्दायं खेचराणां पृथक्स्थम् ।
व्योमाकाशत्विन्दुपक्षैर्भजेत्तत्
स्वायुर्दायाच्छोध्यमब्दादि लब्धम् ॥ १२ ॥

एतत् क्रूरे लग्नगे सौम्यदृष्टे तस्मिन् पापे तत्फलार्धं विशोध्यम् ।
एतरायेनांशसञ्ज्ञे विधेयं पिण्डायुर्वत् कर्म नैसर्गिके च ॥ १३ ॥

वृद्धाचारः कुलाढ्यश्च निपुणस्त्रीजनप्रभुः ।
धनी नृपप्रियश्चन्द्रे सितादित्यसुतान्तरे ॥ १०४ ॥

स्वोच्चस्वमित्रभवनोपगतेषु सर्वं
प्राप्नोति जातमनुजो नियतं यदुक्तम् ।
स्वांशेषु वा निजसुहृद्गृहसंयुतेषु प्राहुः
तथैव फलमस्ति पराशराद्याः ॥ १०५ ॥

चन्द्रः सराहुर्यदि वा सकेतुश्चन्द्रादहिर्वा यदि रिःफयातः ।
नीचास्तगो वा यदि योगकर्ता जातस्य मिश्रं फलमाहुरार्याः ॥ १०६ ॥

## अथ शकटयोगः

षष्ठाष्टमगतश्चन्द्रात्सुरराजपुरोहितः ।
केन्द्रादन्यगतो लग्नाद्योगः शकटसंज्ञितः ॥ १०७ ॥

अपि राजकुले जातो निःस्वः शकटयोगजः ।
क्लेशायासवशान्नित्यं सन्तप्तो नृपविप्रियः ॥ १०८ ॥

## अथ पारिजातादियोगफलानि

सपारिजातद्युचरः सुखानि नीरोगतामुत्तमवर्गयातः ।
सगोपुरांशो यदि गोधनानि सिंहासनस्थः कुरुते विभूतिम् ॥ १०९ ॥

करोति पारावतभागयुक्तो विद्यायशःशीलविपुलं नराणाम् ।
सदेवलोको बहुयानसेनामैरावतस्थो यदि भूपतित्वम् ॥ ११० ॥

## अथ अधमादि योगः

अधमसमवरिष्ठान्यर्ककेन्द्रादिसंस्थे
शशिनि विनयवित्तज्ञानधीनैपुणानि ।
अहनि निशि च चन्द्रे स्वाधिमित्रांशके वा
सुरगुरुसितदृष्टे वित्तवान् स्यात् सुखी च ॥ १११ ॥

शुभयोगभवो वाग्मी रूपशीलगुणान्वितः ।
पापयोगोद्भवः कामी पापकर्मा परार्थभुक्  ॥ १२५ ॥

शुभकर्तरिसञ्जातस्तेजोवित्तबलाधिकः ।
पापकर्तरिके पापी भिक्षाशी मलिनो भवेत्  ॥ १२६ ॥

## अथ पर्वतयोगः

सौम्येषु केन्द्रगृहगेषु सपत्नरन्ध्रे
शुद्धेऽथवा शुभयुते यदि पर्वतः स्यात् ।
लग्नान्त्यपौ यदि परस्परकेन्द्रयातौ
मित्रेक्षितौ भवति पर्वतनाम योगः  ॥ १२७ ॥

भाग्यान्वितः पर्वतयोगजातो विद्याविनोदाभिरतः प्रदाता ।
कामी परस्त्रीजनकेलिलोलस्तेजोयशस्वी पुरनायकः स्यात् ॥ १२८ ॥

## अथ काहलयोगः

अन्योन्यकेन्द्रगृहगौ गुरुबन्धुनाथौ
लग्नाधिपे बलयुते यदि काहलः स्यात् ।
कर्मेश्वरेण सहिते तु विलोकिते वा
स्वोच्चस्वके सुखपतौ यदि तादृशः स्यात्  ॥ १२९ ॥

ओजस्वी साहसी मूर्खश्चतुरङ्गबलैर्युतः ।
यत्किञ्चिद्ग्रामनाथस्तु जातः स्यात् काहले नरः ॥ १३० ॥

## अथ मालिका योगाः

लग्नादिसप्तगृहगा यदि सप्त खेटा
जातो महीपतिरनेकगजाश्वनाथः ।
वित्तादिगो निधिपतिः पितृभक्तियुक्तो
धीरोऽग्र्यरूपगुणवान् नरचक्रवर्ती  ॥ १३१ ॥

